ॐ

## आनन्दगिरिकृततत्त्वालोकस्थदशोपनिषत्षड्लिंगानां संग्रहः :-

तत्र षड्लिंगाः तल्लक्षणानि चः-

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये ।। १ ।।

उपक्रमोपसंहारौ :-

वस्तुनः प्रतिपाद्यस्यादावन्ते प्रतिपादनम् । उपक्रमोपसंहारौ तदैक्यं कथितं बुधैः ।। २ ।।

अभ्यास :-

वस्तुनः प्रतिपाद्यस्य पठनं च पुनःपुनः ।अभ्यासः प्रोच्यते प्राज्ञैः स एवावृत्तिशब्दभाक् ।। ३ ।।

अपूर्वता :-

श्रुतिभिन्नप्रमाणैरविषयत्वमपूर्वता । कुत्रचित्स्वप्रकाशत्वमप्यमेयतयोच्यते ।। ४ ।।

फलम् :-

श्रूयमाणन्तु तज्ज्ञानात्तत्प्राप्त्यादिप्रयोजनम् । फलं प्रकीर्तितं प्राज्ञैर्मुख्यं मोक्षैकलक्षणम् ।। ५ ।।

अर्थवादः :-

वस्तुनः प्रतिपाद्यस्य प्रशंसनमथापि च । निंदा तद्विपरीतस्य ह्यर्थवादः स्मृतो बुधैः ।। ६ ।।

उपपत्तिः :-

वस्तुनः प्रतिपाद्यस्य युक्तिभिः प्रतिपादनम् । उपपत्तिः प्रविज्ञेया दृष्टान्ताद्या ह्यनेकधा ।। ७ ।।

अथेशावास्योपनिषदि षड्लिंगदर्शनम् :-

ईशावास्यमुपक्रम्योपसंहारः स पर्यगात् । अनेजदेकमित्याद्योऽभ्यासस्तस्याद्वयस्य च ।। ८ ।।
नैनद्देवा अपूर्वत्वं फलं मोहाद्यभावकम् । कुर्वन्नित्यनुवाद्यैवासूर्य्या भेदविनिन्दनम् ।। ९ ।।
तस्मिन्नपो मातरिश्वेत्युपपत्तिः प्रदर्शिता । एतैरीशोपनिषदोऽद्वैते तात्पर्यमिष्यते ।। १० ।।

मंत्र १: ईशावास्यमिदं - उपक्रमः, मंत्र ८: स पर्यगाच्छुक्रमकायं- उपसंहारः, मंत्र ४ प्रथमपादः अनेजदेकं मनसो जवीयो एवं मंत्र ५: तदेजति तन्नैजति - अभ्यासः, मंत्र ४ द्वितीयपादः नैनद्देवा आप्नुवन् -अपूर्वता, मंत्र ६: ततो न विजुगुप्सते... एवं मंत्र ७: तत्र को मोहः - फलम्, मंत्र २: कुर्वन्नेवेह... एवं मंत्र ३: असुर्या नाम ते - अर्थवादः, मंत्र ४ तृतीयचतुर्थपादौः तद्धावतो...तस्मिन्नपो... - उपपत्तिः । मंत्र ९ - १६ उपासनादिविषयः ।।

अथ केनोपनिषदि षड्लिंगदर्शनम् :-

श्रोत्रस्येत्याद्युपक्रम्य प्रतिबोधादिवाक्यतः । उपसंहार एवोक्तस्तदैक्यं ज्ञायते बुधैः ।। ११ ।।
तदेव ब्रह्म त्वं विद्धीत्याद्यभ्यास उदीरितः । न तत्रैत्याद्यपूर्वत्वं प्रेत्यास्मादिति वै फलम् ।। १२ ।।
ब्रह्म हेत्याद्यर्थवादोऽविज्ञातमिति चान्तिमम् । एतैः केनोपनिषदोऽद्वैते तात्पर्यमिष्यते ।। १३ ।।

मंत्र १.२: श्रोत्रस्य श्रोत्रं - उपक्रमः, मंत्र २.४: प्रतिबोधविदितं - उपसंहारः, १.४ मंत्रादारभ्य मंत्र १.८ पर्यन्तः तदेव ब्रह्म त्वं विद्धि - अभ्यासः, मंत्र १.३: न तत्र चक्षुर्गच्छति - अपूर्वता, मंत्र २.५: भूतेषु भूतेषु विचित्य - फलम्, ३.१ मंत्रादारभ्य खण्डान्तः ब्रह्म ह देवेभ्यो - अर्थवादः, मंत्र २.२: नाहं मन्ये सुवेदेति एव २.३: यस्यामं तस्य मतं - उपपत्तिः । चतुर्थखण्डस्तु उपासनादि विषयः ।।

अथ कठोपनिषदि षड्लिंगदर्शनम् :-

येयं प्रेते मनुष्ये त्वित्यादिःसामान्यतस्तथा । अन्यत्र धर्मतस्त्वित्यादिवाक्याच्च विशेषतः ।। १४ ।।
उपक्रमोऽङ्गुष्ठमात्र इत्यारभ्योपसंहृतिः । न जायतेऽशरीरं च नित्यानां नित्य एव सः ।। १५ ।।
चेतनोऽचेतनानां च बहूनामेक एव च । अस्तीत्येवोपलब्धव्य इत्याद्यभ्यास ईरितः ।। १६ ।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

नैव वाचा न मनसेत्याद्यपूर्वत्वमिंगितम्। मृत्युप्रोक्तां त्वेवमाद्यां फलं श्रुत्या समीरितम्।। १७।।
स लब्ध्वा मोदनीयं वै फलं प्रोक्तं स्फुटं तथा। ब्रह्म क्षत्रं च युगलमोदनं त्वेवमादितः।। १८।।
अर्थवादश्च युक्तिर्वै त्वग्निरित्यादिवाक्यतः। एभिः कठोपनिषदोऽद्वैते तात्पर्यमिष्यते।। १९।।
मंत्र १.१.२०: येयं प्रेते विचिकित्सा मनुष्ये - सामान्योपक्रमः, मंत्र १.२.१४: अन्यत्र धर्मादन्यत्राधर्माद् - विशेषोपक्रमः, मंत्र २.३.१७: अंगुष्ठमात्रः पुरुषोऽंतरात्मा - उपसंहारः, मंत्र १.२.१८: न जायते म्रियते... एवं मंत्र १.२.२१: अशरीरं शरीरेषु... तथा मंत्र २.२.१३: नित्यो नित्यानां - अभ्यासः, मंत्र २.३.१२: नैव वाचा न मनसा - अपूर्वता, मंत्र १.२.१३ स मोदते मोदनीयं लब्ध्वा.. एवं मंत्र २.३.१८: ब्रह्म प्राप्तो विरजोऽभूत् - फलं, मंत्र १.२.२४: यस्य ब्रह्म च क्षत्रं च.. एवं २.१.१० मृत्योः स मृत्युमाप्नोति - अर्थवादः, २.२.९ मंत्रादारभ्य मंत्र २.२.११ पर्यन्तः अग्निर्यथैको भुवनं प्रविष्टो.. एवं मंत्र २.१.३: येन रूपं रसं गन्धं - उपपत्तिः।

अथ प्रश्नोपनिषदि षड्लिंगदर्शनम् :-

ब्रह्मपरा हि वै ब्रह्मनिष्ठा इत्युपक्रम्य तत्। तान्होवाचैतावदेवोपसंहारस्तदेकता।। २०।।
एतद्वै सत्यकामेति यत्तदभ्यास उच्यते। इहैवान्तःशरीरे तु सोम्य चेत्याद्यपूर्वता।। २१।।
तं वेद्यं पुरुषं वेदेत्यादितः फलमुच्यते। तदच्छायमदेहं चेत्यादिभिः कथिता स्तुतिः।। २२।।
नदीसमुद्रदृष्टान्तादुपपत्तिः प्रदर्शिता । एतैः प्रश्नोपनिषदोऽद्वैते तात्पर्यमिष्यते।। २३।।
मंत्र १.१: ब्रह्मपरा ब्रह्मनिष्ठा परं ब्रह्मान्वेषमाणाः - उपक्रमः, मंत्र ६.७: एतावदेवाहमेतत्परं वेद नातः परमस्ति - उपसंहारः, मंत्र ५.२: सत्यकाम! परं चापरं च यदोंकारः.. एवं मंत्र ५.७: यत्तच्छान्तमजरं - अभ्यासः, मंत्र ६.२: इहैवान्तःशरीरे सोम्य! स पुरुषो - अपूर्वता, ६.६ मंत्रस्योत्तरार्धः मा वो मृत्युः परिव्यथा - फलं, मंत्र ४.१०: अक्षरं वेदयते यस्तु सोम्य! स सर्वज्ञः सर्वो भवति - अर्थवादः, मंत्र ६.५: स यथेमा नद्यः स्यन्दमानाः.. एवं ६.६ मंत्रस्य पूर्वार्धः अरा इव रथनाभौ - उपपत्तिः।

अथ मुंडकोपनिषदि षड्लिंगदर्शनम् :-

अथ परेत्युपक्रम्य यो ह वै परमं च तत्। ब्रह्म वेदेत्यादिवाक्यादुपसंहार ईरितः।। २४।।
आविः सन्निहितं चेति तदेतदक्षरं त्विति। अभ्यासो गृह्यते नैव चक्षुषेत्याद्यपूर्वता।। २५।।
भिद्यते हृदयग्रन्थिरित्याद्यात्फलमीरितम्। यं यं लोकं च हेत्याद्यैरर्थवादः प्रघोषितः।।२६।।
सुदीप्ताग्नेर्यथैत्यादिनोपपत्तिः प्रकाशिता । एतैर्मुडकतात्पर्यमद्वैतेऽंगीकृतं बुधैः।। २७।।
मंत्र १.१.५: अथ परा यया तदक्षरमधिगम्यते। एवं १.१.६: यत्तदद्रेश्यमग्राह्यमगोत्रं - उपक्रमः, मंत्र ३.२.९: स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति - उपसंहारः, मंत्र २.२.१: आविः सन्निहितं एवं मंत्र २.२.२: तदेतदक्षरं ब्रह्म - अभ्यासः, मंत्र ३.१.८: न चक्षुषा गृह्यते नापि वाचा - अपूर्वता, मंत्र २.२.८: भिद्यते हृदयग्रन्थि... एवं मंत्र ३.२.८ विद्वान्नामरूपाद्विमुक्त... तथा मंत्र ३.२.९: ब्रह्म वेद ब्रह्मैव भवति - फलं, मंत्र ३.१.१०: यं यं लोकं मनसा संविभाति....तं तं लोकं जायते - अर्थवादः, मंत्र २.१.१: यथा सुदीप्तात्पावकात् - उपपत्तिः।

अथ माण्डूक्योपनिषदि षड्लिंगदर्शनम् :-

ऊँमिम्येतदुपक्रम्यामात्र इत्युपसंहृतिः। प्रपंचोपशमं शांतमित्याद्यभ्यास ईरितः।। २८।।
अदृष्टमाद्यपूर्वत्वं संविशत्यात्मना फलं। अवांतरफलोक्तिस्तु ह्यर्थवादो विदां मते।। २९।।
अद्वैते च प्रवेशायोपपत्तिः पादकल्पना । मांडूक्योपनिषद्भाव एवेमैरिष्यतेऽद्वये।। ३०।।
मंत्र १: ऊँमित्योतदक्षरमिदं यर्वं - उपक्रमः, मंत्र १२: अमात्रश्चतुर्थो - उपसंहारः, मंत्र ७: अदृष्टमव्यवहार्यं - अपूर्वता, मं. १२: संविशत्यात्मनात्मानं य एवं वेद - फलं, मंत्र ९: आप्नोति ह वै सर्वान्कामान्..एवं मंत्र १०: नास्याब्रह्मवित्कुले भवति.. तथा मंत्र ११: मिनोति ह वा इदं सर्वं - अर्थवादः, मंत्र २: सोऽयमात्मा चतुष्पादित्यादिः - उपपत्तिः।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

अथ तैत्तिरीयोपनिषदि षड्लिंगदर्शनम् :-

ब्रह्मविदित्युपक्रम्य यश्चायं तूपसंहृतिः। तस्माद्वा इत्यथो वाक्यं यदा ह्येवेति चापरम्।। ३१।।
भीषाऽस्मादित्यथोऽभ्यासो यतो वाचो त्वपूर्वता। सोऽश्नुते ब्रह्मणा कामान्सहेत्यादि फलं श्रुतं।। ३२।।
अर्थवादोऽतंरं कुर्यादुदरं भेदनिंदनम् । गायन्नास्ते हि सामैतदित्यादिर्विदुषः स्तुतिः।। ३३।।
यतो भूतानि जायन्ते तत्सृष्ट्वेत्यादितोऽतिमं । तैत्तिरीयश्रुतेर्भाव एवेमैरिष्यतेऽद्वये।। ३४।।
मंत्र २.१: ब्रह्मविदाप्नोति परं - उपक्रमः, मंत्र २.८: स यश्चायं पुरुषे यश्चासावसदित्ये स एकः - उपसंहारः, मंत्र २.१: तस्माद्वा एतस्मादात्मन आकाशः संभूत... एवं मंत्र २.७: यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने... तथा मंत्र २.८: भीषास्माद्वातः पवते - अभ्यासः, मंत्र २.४: यतो वाचो पिवर्तन्तेऽप्राप्य मनसा सह - अपूर्वता, सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा - फलं, मंत्र २.७: यदुदरमन्तरं कुरुते अथ तस्य भयं .. एवं मंत्र ३.१०: एतत्सामगायन्नास्ते - अर्थवादः, मंत्र २.६: तत्सृष्ट्वा तदेवानुप्राविशत् .. एवं मंत्र ३.१: यतो वा इमानि भूतानि जायन्ते - उपपत्तिः।

अथैतरेयोपनिषदि षड्लिंगदर्शनम् :-

आत्मा वा इत्युपक्रम्योपसंहारस्तु चान्तिमे। प्रज्ञानं ब्रह्म वाक्येन महतोक्तो धीधनैः।। ३५।।
स इमानसृजल्लोकान्स ईक्षत सृजा इति। तस्मादिदन्द्र इत्यादिवाक्यैरभ्यास ईरितः।। ३६।।
स जात इत्यपूर्वत्वं प्रज्ञानेत्रं तदित्यपि । स एतेनेतिवाक्येन फलं स्पष्टमुदीरितम्।। ३७।।
ता एता देवताः सृष्टास्तथा गर्भे नु सन्निति। स्तुतिर्युक्तिस्तु स इमानित्यारभ्य विदार्य सः।। ३८।।
एतं सीमानमित्यादि - श्रुतिवाक्यात् प्रकीर्तिता। इमैरुक्तैस्तु षड्लिंगैरैतरेयश्रुतौ गतम्।। ३९।।
तात्पर्यं ज्ञायतेऽद्वैते तन्निष्ठैर्वेदपारगैः। तथा मुमुक्षुभिः सर्वैरपि विज्ञेयमादरात्।। ४०।।
मंत्र १.१.१: आत्मा वा इदमग्र आसीत् - उपक्रमः, मंत्र ३.३: प्रज्ञानं ब्रह्म - उपसंहारः, मंत्र १.१.२: स इमाँल्लोकानसृजत.. एवं मंत्र १.१.३: स ईक्षतेमे नु लोका लोकान्नु सृजा.. तथा मंत्र १.३.१४: तस्मादिदन्द्रो नाम - अभ्यासः, मंत्र १.३.१३: स जातो भूतान्यभिव्यैक्षत् - अपूर्वता, मंत्र ३.४: स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत् - फलं, मंत्र १.२.१ ता एता देवता सृष्टाः.. एवं मंत्र २.५: गर्भे नु सन्नन्वेषामवेदमहं - अर्थवादः, मंत्र १.१.२: स इमाँल्लोकानसृजत.. एवं मंत्र १.३.१२: स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत - उपपत्तिः।

अथ छान्दोग्योपनिषदि षड्लिंगदर्शनम् :-

तत्र षष्ठाध्यायस्थषड्लिंगानि :-
सदेवेत्युपक्रम्यैवैतदात्म्यमिदमित्यतः । उपसंहृतिरभ्यासो नवकृत्व उदीरितः ।। ४१।।
तत्त्वमसीतिवाक्यस्यावर्तनादुबुद्धिमत्तमैः । अत्रैव सोम्य सन्नेत्यपूर्वतोक्ता हि पण्डितैः।। ४२।।
तावदेव चिरं तस्येत्यादिवाक्यात्फलं स्मृतम्। तमादेशमुताप्राक्ष्य इत्यादेः स्तुतिरीरिता।। ४३।।
उपपत्तिर्यथा सोम्यैकेनेत्यादिनिदर्शनम्। एतैश्छान्दोग्यतात्पर्यं षष्ठगं त्विष्यतेऽद्वये।। ४४।।
मंत्र ६.२.१: सदेव सोम्येदमग्र आसीत् - उपक्रमः, मंत्र ६.१६.३: ऐतदात्म्यमिदं सर्वं - उपसंहारः, ६.८.७ मंत्रादारभ्य ६.१६.३ पर्यन्तं नवकृत्व तत्त्वमसीत्युपदेशः - अभ्यासः, मंत्र ६.१३.२: अत्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किल - अपूर्वता, मंत्र ६.१४.२: तस्य तावदेव चिरं यावन्नविमोक्ष्ये अथ संपत्स्ये - फलं, मंत्र ६.१.२: तमादेशमप्राक्ष्यः एवं मंत्र ६.१.३: येनाश्रुतं श्रुतं भवति - अर्थवादः, मंत्र ६.१.४: यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् - उपपत्तिः।
अथ सप्तमाध्यायस्थषड्लिंगानि :-
शोकं तरति तद्वेत्तेत्युपक्रम्योपसंहृतिः। तस्य ह वेति वाक्येन तदैक्यमनुभूयताम्।। ४५।।
अधस्ताच्च स एव स्यात्तथाऽथातस्त्वहंकृतेः। आदेशश्च स्मृतोऽभ्यासोऽथात आत्मोपदेशयुक्।। ४६।।
वागादिसर्वविद्यानामगोचरतयाऽऽत्मनः । अपूर्वता फलं पश्यो नैव मृत्युं हि पश्यति।। ४७।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

पश्य: पश्यति सर्वं हीत्यर्थवाद: सुसूचित:। जाता वा आत्मत: प्राणादयो युक्ति: प्रदर्शिता।। ४८।।
छांदोग्यश्रुतितात्पर्यं सप्तमाध्यायगं बुधै:। इष्यते चाद्वये भूम्नि षड्भिर्लिंगैरिमै: स्फुटम्।। ४९।।
मंत्र ७.१.३: तरति शोकमात्मवित् -उपक्रम:, मंत्र ७.२६.१: एवं विजानत आत्मत: प्राण - उपसंहार:, मंत्र ७.२५.१: स एवाधस्तात्स उपरिष्टात्...अथातोऽहंकारादेश एवाहमेवाधस्तात्... एवं मंत्र ७.२५.२: अथात आत्मादेश एवात्मैवाधस्तात् - अभ्यास:, मंत्र ७.१.३: सोऽहं भगवो मंत्रविदेवास्मि नात्मवित् - अपूर्वता, मंत्र ७.२६.२: न पश्यो मृत्युं पश्यति - फलं, मंत्र ७.२६.२: सर्वं ह पश्य: पश्यति सर्वमाप्नोति सर्वश: - अर्थवाद:, मंत्र ७.२६.१ आत्मत: प्राण आत्मत आशा - उपपत्ति:।

अथाष्टमाध्यायस्थषड्लिंगानि :-

य आत्मेत्युपक्रम्यैव तं वा एतमुपासते। इत्यादिनोपसंहार एव आत्मेतिवाक्यत:।। ५०।।
अभ्यासोऽपूर्वता ब्रह्मचर्येणेत्यादित: फलं। पुनरावर्तते नैव स इत्यादिरवेरितम्।। ५१।।
आख्यायिकार्थवाद: स्यादिंद्रस्यासुरस्वामिन:। अशरीरो वायुरभ्रमित्यादिर्युक्तिरीरिता।। ५२।।
छांदोग्यश्रुतितात्पर्यमष्टमाध्यायगं त्विमै:। इष्यतेऽद्वय एवास्मिन्ब्रह्मण्येतत्प्रदर्शितम्।। ५३।।
मंत्र ८.७.१: य आत्मापहतपाप्मा - उपक्रम:, मंत्र ८.१२.६: तं वा एतं देवा आत्मानमुपासते -उपसंहार:, ८.७.४ मंत्रादारभ्य ८.११.१ पर्यन्तं 'एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्म' इति चतु:कृत्व उपदेश: - अभ्यास:, मंत्र ८.४.३: तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणा- नुविन्दन्ति तेषामेष ब्रह्मलोक: - अपूर्वता, मंत्र ८.१५.१: ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते - फलं, ८.७.१ मंत्रादारभ्य ८.१२.६ पर्यन्ता येन्द्रविरोचनयोराख्यायिका सा - अर्थवाद:, मंत्र ८.१२.२: अशरीरो वायुरभ्रं विद्युत्स्तनयित्नु-रशरीराण्येतानि - उपपत्ति:।

अथ बृहदारण्यकोपनिषदि षड्लिंगदर्शनम् :-

तत्र प्रथमाध्यायस्थषड्लिंगानि :-

आत्मेत्येवेत्यादिवाक्यादुपक्रम्योपसंहृति:। लोकमात्मानमेवोपासीतेत्यादिसमीरणात्।। ५४।।
तदेतत्पदनीयं च तदेतत्प्रेय इत्यपि। वाक्यमारभ्य संप्रोक्तोऽभ्यासस्तस्य परात्मन:।। ५५।।
तदाहुर्यदितीराया अपूर्वत्वं समिंगितं। य एवं वेद वाक्येन सर्वात्मत्वं फलं स्मृतम्।। ५६।।
तस्याभूत्यै हि देवाश्च नेशते हेतिवाक्यत:। अर्थवादो द्विरूपो वै प्रोक्त: श्रुत्या स्फुटोक्तित:।। ५७।।
उपपत्ति: स एषो हीहेतिवाक्यात्स्मृता त्विमै:। बृहदारण्यकाद्यस्याद्वैते तात्पर्यमिष्यते।। ५८।।
मंत्र १.४.७: आत्मेत्येवोपासीत - उपक्रम:, मंत्र १.४.१५: आत्मानमेव लोकमुपासीत - उपसंहार:, मंत्र १.४.७: तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा... एवं मंत्र १.४.८: तदेतत्प्रेय: पुत्रात्प्रेयो वित्तात्... तथा मंत्र १.४.१०: अहं ब्रह्मास्मि - अभ्यास:, मंत्र १.४.९: तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते - अपूर्वता, मंत्र १.४.१०: य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति - फलं, मंत्र १.४.१०: तस्य ह न देवाश्च नाभूत्या ईशते - अर्थवाद:, मंत्र १.४.७: स एष इह प्रविष्ट आनखाग्रेभ्य: - उपपत्ति:।

अथ द्वितीयाध्यायस्थषड्लिंगानि :-

ब्रह्म तेऽहं ब्रवाणीति सामान्योपक्रम: स्मृत:। व्येव त्वा ज्ञपयिष्यामि विशेषोपक्रमस्त्वयम्।। ५९।।
य एष: पुरुषो विज्ञानमयस्तूपसंहृति:। सामान्यतो विशेषेण तदेतद्ब्रह्म चेत्यपि ।। ६०।।
सत्यं सत्यस्य चाथात आदेशो नेति नेति च। स योऽयमिति चाभ्यासो बहुकृत्व उदीरित:।। ६१।।
विज्ञातारमरे केनेत्यादिनाऽपूर्वता मता। यत्र वास्य ह्यभूदात्मैव सर्वं चादित: फलं।। ६२।।
परादाद्ब्रह्म ते चैवाख्यायिका बहवोऽपि । अर्थवादस्तूपपत्तिरूर्णनाभ्याद्यनेकश: ।। ६३।।
बृहदारण्यकस्यैव द्वितीयस्याद्वितीयके । तात्पर्यं त्विष्यते प्राज्ञैरेभिर्लिंगै: समिंगितै: ।। ६४।।
मंत्र २.१.१: ब्रह्म तेऽहं ब्रवाणि - सामान्योपक्रम: एवं मंत्र २.३.१५: व्येव त्वा ज्ञपयिष्यामि - विशेषोपक्रम:, मंत्र २.१.१६: य एष: पुरुषो विज्ञानमय: - सामान्योपसंहार: तथा मंत्र २.५.१९: तदेतद् ब्रह्मापूर्वमनपरं - विशेषोपसंहार:, मंत्र २.१.२०: सत्यस्य सत्यं एवं मंत्र २.३.६: अथात आदेशो नेति नेति तथा २.५.१ मंत्रादारभ्य २.५.१५ पर्यन्तं 'स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वं' इति वाक्यांश: पंचदशकृत्व: कथित: - अभ्यास:, मंत्र २.४.१४: विज्ञातारमरे! केन विजानीयात् - अपूर्वता, मंत्र २.४.



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

१४: यत्र वास्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् - फलं, मंत्र २.४.६: ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद - अर्थवाद:, मंत्र २.१.२०: स यथोर्णनाभिस्तन्तुना- उच्चरेद्यथाऽग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्ति एवं मंत्र २.४.८ इत्यत आरभ्य मंत्र २.४.१२ पर्यन्ता श्रुतयोऽपि द्रष्टव्या - उपपत्तिः।

अथ तृतीयाध्यायस्थषड्लिंगानि :-

यत्साक्षादित्युपक्रम्योपसंारस्तु वाक्यतः। विज्ञानमित्यतः प्रोक्त आवृत्तिरेष ते रवात्।। ६५।।
तं त्वौपनिषदं चाहं पृच्छामीति त्वपूर्वता। फलं परायणं चैतत्तिष्ठमानस्य तद्विदः।। ६६।।
यो वै तत्काप्य सूत्रं तं विद्याच्चेत्यादितोऽपि च। यो वा एतच्च न ज्ञात्वाऽक्षरं गार्गीति च स्तुतिः।। ६७।।
एतस्य वा अक्षरस्येत्यादितो युक्तिरीरिता। तटस्थलक्षणस्योपन्यासेन परमात्मनः।। ६८।।
बृहदारण्यकश्रुत्यास्तृतीयस्य समिष्यते । तात्पर्यमद्वये लिंगैरेभिस्तु परमात्मनि ।। ६९।।

मंत्र ३.४५.१: यत्साक्षादपरोक्षाद्ब्रह्म - उपक्रमः, मंत्र ३.९.२८: विज्ञानमानन्दं ब्रह्म - उपसंहारः, ३.७.३ मंत्रादारभ्य मंत्र ३.७.२३ पर्यन्तं यदुक्तं 'एष त आत्माऽंतर्याम्यमृतः' स - अभ्यासः, मंत्र ३.९.२६: तं त्वौपनिषदं पुरुषं पृच्छामि - अपूर्वता, मंत्र ३.९.२८: रातिर्दातुः परपयणं तिष्ठमानस्य तद्विदः - फलं, मंत्र ३.७.१: यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति स ब्रह्मवित्... एवं मंत्र ३.८.१०: एतदक्षरं गार्ग्यविदित्वास्मिँल्लोके जुहोति - अर्थवादः, मंत्र ३.८.१०: एतस्य वा अक्षरस्य प्रशासने गार्गि - उपपत्तिः।

अथ चतुर्थाध्यायस्थषड्लिंगानि :-

इन्धश्च किमुपक्रम्याभयं स उपसंहृतिः। सामान्यतो विशेषेण यत्र त्वस्येति वाक्यतः।। ७०।।
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्। इत्यादिबहुभिर्वाक्यैरभ्यासः स्पष्टमीक्ष्यते।। ७१।।
विज्ञातारमगृह्यो च न तं पश्यत्यपूर्वता । अथाकामयमानो य इत्यादिबहुभिः फलं।। ७२।।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति। एत एतमुहैवेत्यादिवाक्याच्च स्तुतिः स्मृता।। ७३।।
यद्वै तन्नेति प्राणस्य प्राणं चैव न वा अरे। पत्युः कामाय नैवायं पतिर्हि भवति प्रियः।। ७४।।
इत्यादिवाक्यजातेनोपपत्तिः परिकीर्तिता । बृहदारण्यकश्रुत्याश्चतुर्थाध्यायगं बुधाः ।। ७५।।
तात्पर्यमद्वये षड्भिरेवेमे लिंगकैर्विदुः। अग्नेर्धूम इवेमानि लिंगान्यस्य परात्मनः।। ७६।।
इति संक्षेपतः प्रोक्ता षड्लिंगानां विचारणा। दशोपनिषदां तद्वत्तामन्यास्वपि योजयेत्।। ७७।।

मंत्र ४.२.२: इन्धो ह वै नाम - सामान्योपक्रमः एवं मंत्र ४.३.२: किं ज्योतिरयं पुरुषः - विशेषोपक्रमः, मंत्र ४.४.२५: अभयं वै जनक! प्राप्तोऽसि - सामान्योपसंहारः एवं मंत्र ४.५.१५: यत्र त्वस्य सर्वमात्मैवाभूत् - विशेषोपसंहारः, मंत्र ४.४.१६: तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् - अभ्यासः, मंत्र ४.३.१४ न तं पश्यति कश्चन एवं मंत्र ४.४.२२: अगृह्यो न हि गृह्यते तथा मंत्र ४.५.१५: विज्ञातारमरे केन विजानीयात् - अपूर्वता, मंत्र ४.४.६: अथाकामयमानो यो - फलं, मंत्र ४.४.१९: मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति एवं मंत्र ४.४.२२: एतमु हैवैते न तरतः - अर्थवादः, मंत्र ४.३.२३ इत्यतः ४.३.३० इत्यन्तः यद्वै तन्न पश्यति .. एवं मंत्र ४.४.१८ प्राणस्य प्राणमुत तथा मंत्र ४.५.६इत्यारभ्य ४.५.१३ इत्यतो यदुक्तं 'न वा अरे पत्शुः कामाय पतिः प्रियो भवति' सा - उपपत्तिः।

इदमत्रावधेयं :-

सर्वेषूपनिषद्ग्रन्थेषूपासनमनेकधा। ज्ञानशेषं तु तज्ज्ञेयं चित्तशुद्धिकरं यतः ।। ७८।।
तस्माद्येष्वध्यायेषु प्रकरणेषु वोपासनानि प्रोक्तानि तेषु षड्लिंगविचारणा न कृताऽसंभवात्।
दोषोऽप्यत्रोपयुक्तत्वाद्गुण एवेति चिन्त्यताम्। सारग्रहणशीलैस्तु पितृभ्यां बालवाक्यवत्।। ७९।।
यतः ततः तर्क्यताम्, मा कुतर्क्यताम्।
यदत्र सौष्ठवं किंचित्तद् गुरोरेव मे न हि। यदत्रासौष्ठवं किंचित्तन्ममैव गुरोर्न हि।। ८०।।

।। ब्रह्मार्पणमस्त्वित्यों शम्।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM